# संस्कृतवार्ता:

दिनाङ्क :- 23.06.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- इरान्-इजरायल-देशयोः प्रक्षेपास्त्र-प्रहाराणाम् विनिमयः निरन्तरं प्रचलति; इरान्-देशस्य विदेशमन्त्री रशियादेशस्य शीर्षनेतृत्वेन सह वार्तालापार्थं मास्को-नगरं सम्प्राप्तः।
- आयर्लेण्ड्-देशे कनिष्क-विमान-विस्फोटस्य चत्वारिंशत्तमे वर्षे केन्द्रीयमन्त्री हरदीपसिंह-पुरी अन्ताराष्ट्रिय-समुदायं आतङ्कवादं विरुध्य एकीकर्तुं आहूतवान्।
- कृतज्ञराष्ट्रम् डा. श्यामाप्रसाद मुखर्जीवर्यस्य बलिदानदिने श्रद्धाञ्जलिम् अर्पयति।
- इरान्-देशस्य होर्मुज़्-जलसंधि-बन्धस्य प्रस्तावात् परं वैश्विक-तैल-मूल्यानि वर्धन्ते।
- क्रिकेट्-क्रीडायां, लीड्स्-नगरस्य हेडिङ्ग्ले-क्रीडांगणे प्रथम-निकष-क्रीडायाः चतुर्थ-दिने इङ्ग्लेण्ड्-देशं विरुध्य भारतीयदलं मध्यावकाशं यावत् त्रयाणां क्रीडकाणां हानौ त्रिपञ्चाशदधिकैकशतधावनाङ्कान् समर्जयत।

---------------------------------

इरान्-इस्रेल्-सङ्घर्षः-

ईरान्-इजरायल्-देशयोः मध्ये सङ्घर्षः नैरन्तर्येण प्रचलन्नस्ति। र्युटर्स् इत्यनुसारं, अद्य येरुशलम्-नगरं भयाक्लान्तमासीत्, यतः तस्योपरि प्रक्षेपास्त्राणि दृष्टानि, सुदूरञ्च विस्फोटाः अभवन्। तदनन्तरं इजरायल्-सैन्येन मध्य-दक्षिण-इजराइल-देशे रक्तवर्णीया सञ्चेतनाध्वनिः प्रसारिता। ईरान्-देशस्य परमाणु-सौकर्येषु अमेरिकायाः आक्रमणस्य प्रत्यक्ष-प्रतिकाररूपेण, विश्वस्य महत्त्वपूर्णतमेषु तैल-वायु-नौवहन-मार्गेषु अन्यतमस्य होर्मुज़्-जलसंधिं बन्धयितुं प्रस्तावः ईरान्-देशस्य संसदेन सर्वसम्मत्या अनुमोदितः। परन्तु, अन्तिमोपक्रमे ईरान इत्यस्य सर्वोच्च-राष्ट्रिय-

सुरक्षा-परिषदः अनुमोदनम् अपेक्षते। चीनदेशः इरान्-इजरायल्-देशयोः शत्रुतां शमयितुं आवाहनम् अकरोत्। अमेरिकादेशस्य सैन्याधिकारिणः सम्पूर्णे देशे सैन्य-समूहान् अत्यधिक-जागरूकतायां स्थापयन्तः सन्ति। अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन इरानदेशे शासनपरिवर्तनस्य सम्भावनेति विषये संकेतितमस्ति। इरान्-देशस्य विदेशमन्त्री अब्बास् अराघ्ची इत्येषः रशियादेशस्य शीर्षनेतृत्वेन सह उच्चस्तरीय-संवादाय रशियादेशस्य राजधानीम् सम्प्राप्तोऽस्ति। इरान्-देशस्य दीर्घकालिक मित्रराष्ट्ररूपेण, अस्मिन् क्षेत्रे महत्त्वपूर्णशक्तिरूपेण च रशियादेशः अस्मिन् गहनतर-सङ्कटे सम्भाव्य-मध्यस्थः इति मन्यते।

---------------------------------

**आपरेशन् सिन्धुः-**

भारतदेशः ईरान-इजरायलदेशयोर्मध्ये वर्धमानसंघर्षे ईरान्-इजरायल्-देशाभ्यां भारतीय-नागरिकान् प्रत्यावर्तयितुं आपरेशन् सिन्धू इत्यस्यान्तर्गतं बृहन्मात्रायां निर्वासनप्रयासं प्रचालयति। नवीनतमविकासे ईरान्-देशस्य मशाद्-नगरात् विशेषविमानेन गतरात्रौ पञ्चाशीत्यधिकद्विशत-भारतीयनागरिकाः सुरक्षितरूपेण नवदेहली-नगरं प्राप्तवन्तः। प्रत्यागतानां स्वागतम् कुर्वन्, विदेशराज्यमन्त्री पबित्र मार्गरीटा इत्यनेन दृढीकृतं यत् ईरान्-देशात् पुनः आनीतानां भारतीयानां सङ्ख्या अधुना त्रयोदशोत्तरसप्तदशशतम् अभवत् इति।

तत्सम्बद्धे परिवर्तने, इजरायल्-देशे, जोर्डन्-देशे च भारतीय-नियोगैः संयुक्तप्रयासे षष्ट्युत्तरैकशत-भारतीय-नागरिकाः निष्कासिताः, यदा इजरायल्-देशस्य वायुप्रदेशः निरुद्धः अभवत्, तथा च अस्मिन् प्रदेशे वर्धमानसंघर्षात् वाणिज्यिक-विमानयानानि च स्थगितानि। विदेशमन्त्रालयेन ईरान्-इजरायल्-देशयोः स्थितेभ्यः भारतीयनागरिकेभ्यः आग्रहः कृतः यत् तेह्रान्-नगरस्य भारतीय-दूतावासस्य आपत्कालीन-सहायताकेन्द्र-माध्यमेन, नवदेहली-नगरस्य अहर्निशचलायमानेन नियन्त्रण-कक्षेण च सम्पर्कं स्थापयतु इति।

---------------------------------

**कनिष्कविस्फोट/श्रद्धाञ्जलि:**

विदेशमन्त्रिणा डॉ. एस. जयशंकरेण सह केन्द्रीयमन्त्रिणा हर्दीपसिंहपुरिणापि अष्टसदस्ययुतेन भारतीयप्रतिनिधिमण्डलेन सह अद्य आयर्लैण्डदेशस्य कौर्क-नगरस्य 'अहकिस्ता' नामके स्मारके कनिष्कविस्फोटस्य चतुर्विंशतितमे वर्षे विमान-विस्फोटपीडितेभ्य: श्रद्धाञ्जलिः दत्ता। पञ्चाशीत्यधिकैकोनविंशतितमवर्षस्य अस्मिन्नेव दिने, कनाडादेशस्य मौन्ट्रियल-नगरात् लंदन-नगरमार्गेण नवदेहली-नगरं प्रति गच्छत् एयर-इण्डिया-विमानम्- द्व्याशीत्यधिकैकशतम् , आयार्लैन्डदेशस्य तटात् दूरं वायौ एव विस्फोटितम्। आक्रमणे अस्मिन् नवविंशत्यधिकत्रिशतयात्रिकाः मृताः, तेषु भारतीयाः, कनाडा-देशीयाः, अन्ये च विदेशिन: नागरिकाः, बालाश्च आसन्। विदेशमन्त्रिणा डा. एस्. जयशङ्करेण उक्तं यत् आतङ्कवादः निकृष्टतमेषु कार्येषु अन्यतमममस्तीति। अवसरेऽस्मिन् हरदीपपुरिणापि उक्तं यत् आसंसारम् आतङ्कवादं विरुध्य एकता प्रदर्शितव्येति।

---------------------------------

## मुखर्जीवर्यस्य बलिदानदिनम् -

अद्य कृतज्ञराष्ट्रम् डा. श्यामा प्रसाद मुखर्जी-वर्यस्य बलिदानदिवसावसरे, तस्मै श्रद्धाञ्जलिम् अर्पयति। प्रधानमन्त्रिणा नरेन्द्रमोदिना डा. मुखर्जीवर्यं प्रति श्रद्धाञ्जलिः समर्पिता। सामाजिक-प्रसारमाध्यमे श्रीमोदी अलिखत् यत् डा. मुखर्जी-वर्येण देशस्य अक्षुण्ण-अखण्डतायै अतुल्यसाहसेन सह सत्प्रयासाश्च प्रदर्शिताः। राष्ट्रनिर्माणार्थं तस्य अमूल्यं योगदानं सर्वदा श्रद्धया स्मर्यते इत्यपि प्रधानमन्त्री अवदत्। डा. मुखर्जीवर्यः त्रिपञ्चाशदुत्तरैकोनविंशतितमवर्षे अस्मिन्नेव दिने श्रीनगरस्य कारागारे निगूढपरिस्थितौ राष्ट्राय हुतिम् अगच्छत्। भाजपेति दलस्य राष्ट्रिय-अध्यक्षः जे. पी. नड्डाः नवदेहली-नगरस्य दल-मुख्यालये डा. मुखर्जी-वर्याय पुष्पाञ्जलिम् समर्पितवान्। श्री नड्डाः अवदत् यत्, डा. मुखर्जीवर्यः एकः स्वातन्त्र्ययोद्धा, समाजपरिष्कारकश्च आसीत् यो हि जम्मू-कश्मीरस्य भिन्नविशिष्टतायाः विरोधम् अकरोदिति।

---------------------------------

## राष्ट्रपतिः लेखाकार

राष्ट्रपतिः द्रौपदी मुर्मू इत्येषा अकथयत् यत् संसारोऽयं जलवायु-परिवर्तनसङ्कटं सम्मुखीकरोति तथा च सुस्थिरता इदानीमुद्घोषः नास्ति अपितु आवश्यकता वर्तते। नवदेहली-नगरे भारतीय-व्यय-लेखाकार-संस्थानस्य अस्य वर्षस्य राष्ट्रिय-छात्र-दीक्षान्तसमारोहं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, छात्राः स्वकौशलैः राष्ट्रियवाणिज्यजगति महत्परिवर्तनमानेतुं शक्नुवन्तीति। सा अवोचत् यत्, भारतीय-अर्थव्यवस्थां अद्यतनीयस्य विश्वस्य प्रबलतमासु अर्थव्यवस्थासु अन्यतमा कर्तुं भारतीय-व्यय-लेखाकार-संस्था महत्त्वपूर्णां भूमिकां निरवहदिति।

---------------------------------

**प्रधानमन्त्रिण: लेखः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य एकः लेखः प्रस्तुतः यस्मिन् गतैकादशवर्षेषु कृतानि महत्त्वपूर्णानि परिष्कारकार्याणि, भारतस्य खननक्षेत्रे जातोन्नतिः, सहकारीसङ्घवादेन च सह पारदर्शकशासनस्य समुल्लेखो वर्तते। केन्द्रीयमन्त्रिणः जी.किशनरेड्डी इत्यस्य सामाजिक-प्रसार-माध्यमे प्रसारित-लेखे प्रतिक्रियां कुर्वन् श्रीमोदी लेखोऽयं प्रसारितवान्।

---------------------------------

**क्रिकेट क्रीडा**

एण्डर्सन-तेन्दुल्कर-क्रिकेट-निकषस्पर्धायां लीड्स-नगरस्य हेडिङ्ग्ले क्रीडाङ्गणे क्रीड्यमानायाः द्वितीयपार्याः-क्रीडायां चतुर्थे दिने भारतीयदलं त्रयाणां क्रीडकाणां हानौ त्रिपञ्चाशदधिकैकशतधावनाङ्कान् समर्जितवत्। ह्यः तृतीयदिनस्य क्रीडा वृष्ट्या मध्ये एव स्थगितासीत्।

।। इति वार्ता: ।।